दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णनवमी
बैशाख 28 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-198 | 1 | मई 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 तमिलनाडुराज्ये श्री सी. जोसेफ विजयः मुख्यमन्त्रिपदस्य शपथं गृहीतवान्

3 'HPBOSE 10th Result - ८३.८७ प्रतिशतं छात्राः उत्तीर्णाः, काङ्गड़ा-जनपदस्य अनमोल-कन्यया शीर्षस्थानं प्राप्तम्

4 रामरक्षा स्तोत्रे 38 ऊर्जावाहिन्या:.... तेषां क्रमः अधोलिखितप्रकारेण अस्ति-

## यूक्रेनदेशेन सह प्रचल्यमानः युद्ध-विवादः अधुना समाप्ति प्रति गच्छति-व्लादिमीरपुतिनः

रूस देशस्य राष्ट्रपतिना व्लादिमीर पुतिनेन उक्तं यत् यूक्रेनदेशेन सह प्रचल्यमानः युद्ध-विवादः अधुना समाप्ति प्रति गच्छति। तेन पश्चिम-एशियादेशेषु वर्तमानस्य संघर्षस्य अपि शीघ्रसमाधानस्य आशा प्रकटिता। तेन उक्तं यत् यदि विवादः अधिकं वर्धते, तर्हि महद् हानिः भविष्यति। यूरोपीयनेतृभिः सह वार्तालापविषये पृष्टे सति राष्ट्रपतिः पुतिनः अवदत् यत् तादृश्याः चर्चायाः कृते जर्मनीदेशस्य पूर्वचांसलर गेरहार्ड श्रोडर तस्य प्रियः नेता अस्ति। पुतिनः एतदपि उक्तवान् यत् स्थायि शान्ति प्रस्तावस्य अन्तिमरूपस्य निर्णयानन्तरमेव सः यूक्रेनदेशस्य राष्ट्रपतिना व्लोदिमीर जेलेंस्की इत्यनेन सह मिलिष्यति।

## असमराज्ये डॉ. हिमंता बिस्वा शर्मा विधायकदलस्य नेता रूपेण निर्वाचितः



भारतीय जनता पार्टी इति दलस्य वरिष्ठनेता डॉ. हिमंता बिस्वा शर्मा विधायकदलस्य नेता रूपेण निर्वाचितः। प्रातःकाले गुवाहाटी नगरे सम्पन्नायां सभायां रंजीत कुमार दासः, बिस्वजीत दारी, अजंता निओगः, राजदीप रॉयः, अशोक सिंघलः, पीयूष हजारिका समेत अष्ट भाजपाविधायकाः डॉ० हिमन्ताबिस्वा सरमणः नाम प्रस्तावितवन्तः।

## शिक्षा मंत्रालयः ग्रीष्मावकाशकाले देशस्य सर्वेषु विद्यालयेषु भारतीयभाषायाः कृते ग्रीष्मकालीन-शिविरस्य आयोजनं करिष्यति

शिक्षा मंत्रालयः ग्रीष्मावकाशकाले देशस्य सर्वेषु विद्यालयेषु भारतीयभाषायाः कृते ग्रीष्मकालीन-शिविरस्य आयोजनं करिष्यति। एषः एकसप्ताहात्मकः शिविरः भारतीयभाषासु मौलिक संवाद-कौशल-अधिगमाय, शब्द-परिचयाय, आत्मपरिचय-प्रदर्शनाय, वास्तविक-जीवन-संवादाय तथा संस्कृतेः प्रशंसाय च केन्द्रितः भविष्यति।

# प्रधानमन्त्री नरेन्द्रमोदी तेलंगाना राज्ये प्रायः चतुर्नवतिशतकोटिरूप्यकाणांऔद्योगिक-परियोजनानां च उद्घाटनं शिलान्यासं च कृतवान्



प्रधानमन्त्री नरेन्द्रमोदी तेलंगाना राज्ये प्रायः चतुर्नवतिशतकोटिरूप्यकाणां आधारभूत संरचना-औद्योगिक-परियोजनानां च उद्घाटनं शिलान्यासं च कृतवान्। एतासां परियोजनानां उद्देश्यः सम्पर्क-सुदृढीकरणम्, कार्यक्षमतायाः उन्नयनम्, सुरक्षावर्धनम् तथा जनानां कृते उत्तम यात्रानुभवस्य प्रदानेन सह सम्बद्धः अस्ति। हैदराबाद-अन्तर्राष्ट्रीय-सम्मेलन केन्द्रे आयोजिते अस्मिन् कार्यक्रमे तेलंगानाराज्यस्य राज्यपालः शिव प्रताप शुक्ला, मुख्यमंत्री ए रेवंत रेड्डी, केंद्रीय मंत्री जी किशन रेड्डी तथा अन्ये वरिष्ठ-नेतारः उपस्थिताः आसन्। सभां सम्बोधयन् प्रधानमन्त्री मोदी उक्तवान् यत् केन्द्रसर्वकारेण गृहीतानां उपायानां कारणात् भारतदेशः पश्चिम-एशिया-संघर्षजनितं ऊर्जा संकटम् प्रभावी-रीत्या नियन्त्रयति। सः अवदत् यत् आयातित-पेट्रोलियम-उत्पादानां उपयोगः केवलम् आवश्यकतानुसारमेव करणीयः, येन विदेशी मुद्रायाः संरक्षणं भविष्यति तथा वर्तमान-संघर्षस्य प्रतिकूल-प्रभावानां न्यूनीकरणे सहायता भविष्यति।

## दलस्य विजयः केन्द्र प्रशासनस्य राष्ट्रीयनीतिं प्रति जनसमर्थनस्य प्रमाणम् अस्ति-प्रधानमन्त्री

नरेंद्र मोदी उक्तवान् यत् पश्चिमबङ्गः, असमः, पुदुच्चेरी चेत्येतेषु त्रिषु राज्येषु भारतीय जनता पार्टी इति दलस्य विजयः केन्द्र प्रशासनस्य राष्ट्रीयनीतिं प्रति जनसमर्थनस्य प्रमाणम् अस्ति। तेन उक्तं यत् निर्वाचनपरिणाम देशस्य भावना ज्ञायते।बेङ्गलूरुनगरे भाजपा-कार्यकर्तृभ्यः सम्बोधयन् प्रधानमन्त्री मोदी उक्तवान् यत् अद्य तादृश्याः प्रशासनस्य आवश्यकता अस्ति यः शीघ्रं कार्यं कर्तुं शक्नुयात्।, सुशासनं दातुं समर्थः भवेत्। समस्यायाः समाधानं कृत्वा देशः प्रगतिपथे नेतुं च समर्थः भवेत्। तेन अपि उक्तं यत् भाजपादलस्य शासनं अधुना एकविंशतिराज्येषु वर्तते, यत्र लोककल्याणाय देशस्य समृद्धये च कार्यं क्रियते।प्रधानमन्त्री कांग्रेस-दलस्योपरि स्त्रीणां प्रति अविश्वासस्य आरोपम् प्रख्यापितवान्। सः अवदत् यत् कांग्रेस-दलेन संसदि "नारी-वन्दन-संशोधन विधेयकस्य" विरोधे मतदानं कृतम्, यस्मिन् संसदि महिलानां कृते त्रयस्त्रिंशत् प्रतिशत आरक्षणस्य व्यवस्था कृता आसीत्। प्रधानमन्त्री राष्ट्रविकासाय कार्यं कर्तुं तथा च अमरीका-ईरान-युद्धजनितानां समाह्वानानां सम्मुखी कर्तुं जनेभ्यः एकतायाः आवाहनम् अकरोत्।

## उत्तरप्रदेशे भाजपादलस्य षट् नेतारः मन्त्रिरूपेण शपथं गृहीतवन्तः

उत्तर प्रदेश-राज्ये मुख्यमन्त्री योगी आदित्यनाथः स्वमन्त्रिमण्डलस्य विस्तारं कृतवान्। भाजपादलस्य षट् नेतारः मन्त्रिरूपेण शपथं गृहीतवन्तः। राज्यपालया आनंदीबेन पटेल वर्यया लखनऊ-नगरे जनभवने आयोजिते कार्यक्रमे एतेभ्यः मन्त्रिभ्यः पदस्य गोपनीयतायाश्च शपथं प्रदत्ता। भाजपादलस्य पूर्व-प्रदेशाध्यक्षः भूपेंद्र चौधरी तथा भाजपानेता मनोज पांडेयः मन्त्रिमण्डले मन्त्रिणौ नियुक्तौ। राज्य-मन्त्री अजीत पाल सिंहः तथा सोमेंद्र तोमरः च स्वतन्त्रप्रभारयुक्तमन्त्रिणौ अभवताम्। अस्मिन् एव काले कृष्णा पासवानः, सुरेन्द्र दिलेरः, हंसराज विश्वकर्मा तथा कलाश राजपूतः च राज्य-मन्त्रिरूपेण मन्त्रिमण्डले समावेशिताः। अनेन विस्तारेण उत्तर प्रदेश-विधानसभायाः त्र्याधिकचतुः शत सदस्येषु मन्त्रिपरिषदि संख्याः षष्टिः जाता, या स्वीकृतमन्त्रिणां अधिकाः संख्याः अस्ति।

## सुभाषितम्

**यदि सन्ति गुणाः पुंसां, विकसन्त्येव ते स्वयम्।**
**न हि कस्तूरिकामोदः, शपथेन विभाव्यते।।**

भावार्थः- यदि किसी व्यक्ति में कुछ गुण होते हैं तो वे स्वयं फूलों के समान विकसित होकर उसी तरह प्रकट हो जाते हैं जिस प्रकार कस्तूरी अपनी सुगन्ध से प्रसन्न कर स्वयं को प्रकट कर देती है और इसके लिए किसी शपथ की आवश्यकता नहीं होती।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्



# बेङ्गळूरु-नगरे प्रधानमन्त्रिणा मोदिना किमर्थं कृतः हिमाचलप्रदेशस्य उल्लेखः?



**हिमसंस्कृतवार्ताः - नवदेहली।** प्रधानमन्त्रिणा नरेन्द्रमोदिना कर्नाटकस्य बेङ्गळूरु-नगरे आयोजित-कार्यक्रमस्य अन्तराले काङ्ग्रेस-पक्षस्य उपरि तीक्ष्णः प्रहारः कृतः। तेन उक्तं यत् काङ्ग्रेस-पक्षः केवलं "विश्वासघातस्य" राजनीतिं करोति, तस्य प्रत्याभूतयः अपि पूर्णतया मिथ्या सन्ति। प्रधानमन्त्रिणा विश्वासः कृतः यत् काङ्ग्रेस-शासित-राज्येषु स्थितिः शोचनीया अस्ति, तत्र सर्वकाराः स्वकर्मचारिभ्यः समयसारिण्या वेतनमपि दातुं न शक्नुवन्ति। प्रधानमन्त्री बेङ्गळूरु-नगरे 'द आर्ट ऑफ लिविंग' (The Art of Living Foundation) संस्थायाः ४५-तमायाः वर्षगांठ-कार्यक्रमस्य अवसरे सम्मिलितः अभवत्। अस्मिन् समये जनसभां सम्बोधयन् तेन काङ्ग्रेस-नीतीनां, तस्य गठबन्धनस्य तथा विविध-राज्याणां राजनैतिक-स्थितेः उपरि तीव्रः कटाक्षः कृतः।

### हिमाचल-सर्वकारस्य उपरि प्रहारः

स्वसम्बोधने प्रधानमन्त्रिणा मोदी-महोदयेन हिमाचलप्रदेशस्य काङ्ग्रेस-सर्वकारस्य उल्लेखं कुर्वता उक्तं यत् तत्र सर्वकारीय-कर्मचारिणः समयानुसारं वेतनमपि न प्राप्नुवन्ति। तेन उक्तं यत् काङ्ग्रेस-पक्षः निर्वाचन-काले महान्तं वचनं करोति, किन्तु सत्तां प्राप्य तत् पूरयितुं न पारयति। प्रधानमन्त्रिणा उक्तं— "काङ्ग्रेस-पक्षः केवलं विश्वासघातं कर्तुं जानाति। ते स्वयम् अपि असत्यवादिनः सन्ति, तेषां प्रत्याभूतयः अपि असत्याः सन्ति। हिमाचलप्रदेशे काङ्ग्रेस-सर्वकारः कर्मचारिभ्यः तेषां वेतनमपि दातुं न शक्नोति।"

### 'डीएमके' (DMK) काङ्ग्रेस-पक्षयोः सम्बन्धे अपि उत्थापिताः प्रश्नाः

प्रधानमन्त्रिणा तमिळनाडु-राज्यस्य राजनीतिं संसूच्य काङ्ग्रेस-'डीएमके' पक्षयोः पुरातन-सम्बन्धेषु अपि प्रश्नाः उत्थापिताः। तेन उक्तं यत् बहुभ्यः वर्षेभ्यः 'डीएमके' पक्षेण काङ्ग्रेस-पक्षस्य सहयोगः कृतः, केन्द्रे च तस्य सर्वकारः रक्षितः, किन्तु राजनैतिक-परिस्थितयः परिवर्तने सति काङ्ग्रेस-पक्षेण स्वसहयोगि-दलस्य विश्वासघातः कृतः।

तेन उक्तं यत् काङ्ग्रेस-पक्षः सत्तायै कामपि सीमां लङ्घयितुं शक्नोति, अवसरं लब्ध्वा च स्वसहयोगिभ्यः अपि विमुखः भवति। प्रधानमन्त्रिणा काङ्ग्रेस-पक्षं "परजीवी-दलम्" इति वर्णयता उक्तं यत् अधुना तस्मै राजनैतिक-रूपेण स्थातुं अन्यदलानां साहाय्यस्य आवश्यकता वर्तते।

### केरळ-कर्नाटकयोः राजनीति-विषये अपि टिप्पणी

प्रधानमन्त्रिणा मोदिना स्वभाषणे केरळस्य राजनीतिं लक्षीकृत्य अपि काङ्ग्रेस-पक्षस्य उपरि प्रहारः कृतः। तेन उक्तं यत् तत्र दलम् अधुना यावत् मुख्यमन्त्रिणः विषये कस्मिन्नपि निर्णये प्राप्तुं न शक्नोति। तेन आरोपः कृतः यत् काङ्ग्रेस-पक्षः जनतायाः समस्यानां समाधानस्य स्थाने स्वकीयेषु आन्तरिक-विवादेषु निमग्नः अस्ति।

प्रधानमन्त्रिणा उक्तं यत् काङ्ग्रेस-पक्षः स्वकीय-नेतृभ्यः वचनानि करोति, पश्चात् च तान् प्रतारयति। तेन छत्तीसगढ़-राजस्थानयोः उदाहरणं दत्त्वा उक्तं यत् तत्रापि ईदृशः एव राजनैतिक-सङ्घर्षः दृष्टः आसीत्, अधुना सा एव स्थितिः कर्नाटके केरळे च दृश्यते।

# मुख्यमन्त्रिणा सुक्खुना जनेभ्यः पारदर्शिनी-त्वरित-सुरक्षित-सेवाः सुनिश्चितं कर्तुं 'डीडीटीजी' इति विभागः प्रशंसितः

हिमसंस्कृतवार्ताः - शिमला। डिजिटल-टेक्नोलॉजीज-एवं-गवर्नेंस (DDTG) इति विभागः 'ई-गवर्नेंस' दिशि कृतेभ्यः नवाचारेभ्यः नागरिक-केन्द्रित-डिजिटल-मञ्चेभ्यः च राष्ट्रिय-स्तरीयैः पुरस्कारैः सम्मानितः जातः। एते पुरस्काराः विभागस्य सचिवतः आशीष-सिंघमारतः तथा निदेशकात डॉ. निपुण-जिन्दलतः मुख्यमन्त्रिणे ठाकुर-सुखविन्दरसिंहसुक्खु-महोदयाय प्रदत्ताः। विभागस्य अभिनव-आरम्भः 'हिमपरिवार' इति योजना 'दि इकोनॉमिक टाइम्स' पक्षतः 'बेस्ट स्टेट-लेवल ई-गवर्नेंस इनिशिएटिव' श्रेण्यां प्रतिष्ठित-ई.टी.गोव टेक. २०२६ (सिल्वर विनर) पुरस्कारेण सम्मनिता अस्ति। एतदतिरिच्य विभागस्य 'सर्वेक्षणपटलानि' (Survey Platform) ई-गवर्नेंस-श्रेण्यां उत्कृष्ट-कार्येभ्यः स्कॉच-समूहेन 'स्कॉच-अवार्ड-२०२५' पुरस्कारेण अलङ्कृतः। एषः मञ्चः प्रभावशालि-डिजिटल-सर्वेक्षणाय डेटा-आधारित-प्रशासनाय च पुरस्कृतः अस्ति। अपि च विभागस्य हिमपरिवार-हिमएक्सेस-सर्वेमञ्च-इत्येतेभ्यः उपक्रमेभ्यः 'स्कॉच ऑर्डर ऑफ मेरिट रिकॉगनिशन' इत्यपि प्रदानं कृतम्।

मुख्यमन्त्रिणा राज्यस्य जनेभ्यः पारदर्शिनी, त्वरिता, सुरक्षिता च नागरिक-केन्द्रित-सेवाः प्रदातुं डिजिटल-टेक्नोलॉजीज-एवं-गवर्नेंस-विभागस्य प्रयासाः प्रशंसिताः। तेन उक्तं यत् राज्य-सर्वकारः तन्त्रांशस्य (Technology) नवाचारस्य च प्रयोगं कृत्वा जनेभ्यः प्रभावशालिनीं सुलभाम् च सार्वजनिक-सेवां प्रदातुं कटिबद्धः अस्ति। सः आशां प्रकटितवान् यत् विभागः 'डिजिटल-रूपेण सशक्त-हिमाचल' इति दृष्टिं साकारं कर्तुम् एकीकृत-मञ्चाणां निर्बाध-नागरिक-सेवानां च दिशि स्वप्रयासान् निरन्तरं करिष्यति।आशीष-सिंघमारेण उक्तं यत् एते पुरस्काराः राज्ये दृढ-नागरिक-केन्द्रित-डिजिटल-मञ्चानां विकासाय विभागस्य निरन्तर-प्रयासान् दर्शयन्ति। अस्मिन् अवसरे प्रधान-सचिवः देवेश-कुमारः विभागस्य अन्ये वरिष्ठाः अधिकारिणः च उपस्थिताः आसन्।

# तमिलनाडुराज्ये श्री सी. जोसेफ विजयः मुख्यमन्त्रिपदस्य शपथं गृहीतवान्




तमिलनाडुराज्ये टीवीके दलस्य संस्थापकः श्री सी. जोसेफ विजयः प्रातःकाले मुख्यमन्त्रिपदस्य शपथं गृहीतवान्। राज्यस्य राज्यपालः राजेन्द्र विश्वनाथ आर्लेकरस्य आध्यक्षे नेहरू-इण्डोर स्टेडियम् इत्यत्र आयोजिते शपथग्रहणसमारोहे श्रीविजयः पद-गोपनीयतायाश्च शपथं गृहीतवान्। तेन सह नव मन्त्रिणः अपि शपथं गृहीतवन्तः। अस्मिन् अवसरे राहुल गांधी तथा तमिलचलच्चित्रोद्योगस्य अनेकाः प्रसिद्धाः जनाः उपस्थिताः आसन्। श्रीविजयेन ऐतिह्य निर्मितम्, यतः तस्य दलं स्वस्य प्रथम एव निर्वाचने महद् विजयम् अलभत् । कांग्रेस-दलम्, सीपीआई, सीपीआई (एम), वीसीके तथा आईयूएमएल चेत्यादीनां दलानां साहाय्येन श्रीविजयः विंशत्यधिकशत निर्वाचितविधायकानां समर्थनम् अलभत। प्रधानमन्त्री नरेन्द्रमोदी श्री सी. जोसेफ विजयाय पदग्रहणस्य उपलक्ष्ये तस्मै शुभकामनां प्रेषितवान्। श्रीमोदी सामाजिकमाध्यमे सन्देशे उक्तवान् यत् केन्द्र प्रशासनम् तमिलनाडु प्रशासनेन सह मिलित्वा जनानां जीवनस्तरस्य उन्नयनार्थं निरन्तरं कार्यं करिष्यति। तेन श्रीविजयस्य आगामीकार्यकालाय अपि शुभकामनाः प्रदत्ताः।

### श्रीलङ्कादेशस्य राष्ट्रपतिना सी. जोसेफ विजयः इत्यस्मै शपथग्रहणानन्तरं त्वरितमेव शुभकामनाः प्रदत्ताः

श्रीलङ्कादेशस्य राष्ट्रपतिना अनुरा कुमार दिसानायके वीके दलस्य प्रमुखः सी. जोसेफ विजयः इत्यस्मै तमिलनाडुराज्यस्य मुख्यमन्त्रिपदस्य शपथग्रहणानन्तरं त्वरितमेव शुभकामनाः प्रदत्ताः। सामाजिकमाध्यमे एकस्मिन् संदेशे दिसानायके उक्तं यत् श्रीलङ्का-तमिलनाडु उभयोः मध्ये ऐतिहासिकाः, सांस्कृतिकाः, उद्योगाः चेत्यादयः सुदृढाः सम्बन्धाः विद्यन्ते। सः उक्तवान् यत् उभयोर्देशयोः मध्ये भविष्ये अपरिमिताः आर्थिकसम्भावनाः अवसराश्च सन्ति, यतः तौ निरन्तरं परस्परं घनिष्ठसम्बन्धान् सुदृढं कुरुतः।

# बेंगलूरुनगरे आयोजिते आर्ट ऑफ लिविंग संस्थायाः पञ्चचत्वारिंशत्-वर्षपूर्ति-समारोहे श्रीमोदी सहभागितां कृतवान्

प्रधानमन्त्री नरेन्द्रमोदी पर्यावरणं प्रति उत्तरदायित्वभावेन, युवा-सशक्तीकरणेन तथा आन्तरिक शुचितायाः भावनया सह विकसितभारत-निर्माणाय एकतां स्थापयितुं आह्वानम् अकरोत्। बेंगलूरुनगरे आयोजिते आर्ट ऑफ लिविंग संस्थायाः पञ्चचत्वारिंशत्-वर्षपूर्ति-समारोहे श्रीमोदी सहभागितां कृतवान्। तेन संस्थायां नवनिर्मितस्य ध्यानमन्दिरस्य उद्घाटनमपि कृतम् । अस्मिन् अवसरे श्रीमोदी उक्तवान् यत् सेवा, आध्यात्मिकता तथा सामाजिक परिवर्तन चेत्यादिषु क्षेत्रेषु आर्ट ऑफ लिविंग संस्थायाः भूमिका अत्यन्तं महत्त्वपूर्णा अस्ति।

# HPBOSE 10th Result - ८३.८७ प्रतिशतं छात्राः उत्तीर्णाः, काङ्गड़ा-जनपदस्य अनमोल-कन्यया शीर्षस्थानं प्राप्तम्

| RANK | | MARKS | (%) AGE |
|---|---|---|---|
| 1 |  | 699 | 99.86% |
| | | Kangra | |
| 2 |  | 698 | 99.71% |
| | | Una | |
| 2 |  | 698 | 99.71% |
| | | Bilaspur | |
| 2 |  | 698 | 99.71% |
| | | Una | |
| 3 |  | 697 | 99.57% |
| | | Hamirpur | |

हिमसंस्कृतवार्ताः - धर्मशाला।

हिमाचलप्रदेश-विद्यालयीय-शिक्षा-मण्डलेन १०-कक्ष्यायाः परीक्षापरिणामः २०२६ घोषितः। परीक्षायां उपस्थिताः छात्राः अधुना मण्डलस्य आधिकारिक-जालपुटे स्वकीयं परिणामं द्रष्टुं शक्नुवन्ति। १०-कक्ष्यायाः वार्षिक-परीक्षापरिणामः ८३.८७ प्रतिशतं अभवत्। आहत्य ७८,१५० छात्राः उत्तीर्णाः, ८,४३३ छात्राणां च अनुपूरक-परीक्षा ('कम्पार्टमैण्ट्) आगता। विद्यालयीय-शिक्षा-मण्डलस्य अध्यक्षेण डॉ. राजेश-शर्मणा उक्तं यत् ये छात्राः द्वयोः विषययोः अनुत्तीर्णाः सन्ति, तेभ्यः जून-मासे पुनः परीक्षां दातुं अवसरः लप्स्यते।



## काङ्गड़ा-जनपदस्य अनमोल-कन्यया प्राप्तं प्रथमस्थानम्

प्रथमस्थाने 'एवीएम' (AVM) वरिष्ठ-माध्यमिक-विद्यालय-पहरा (काङ्गड़ा) इत्यस्य छात्रा अनमोल ६९९ अङ्कान् प्राप्य सम्पूर्णे प्रदेशे शीर्षस्थानं प्राप्तवती। द्वितीये स्थाने ६९८ अङ्कान् प्राप्य त्रयः छात्राः सन्ति राजकीय-वरिष्ठ-माध्यमिक-विद्यालय-रपोह-मिसरां (ऊना) इत्यस्य छात्रः अभिनव-मेहता, राजकीय-कन्या-वरिष्ठ-माध्यमिक-विद्यालय-बिलासपुरस्य छात्रा पूर्णिमा-शर्मा, तथा च राजकीय-वरिष्ठ-माध्यमिक-विद्यालय-रा पोह-मिसरां (ऊना) इत्यस्याः छात्रा रूहानी-धीमान।

तृतीये स्थाने ६९७ अङ्कान् प्राप्य 'नीलम पब्लिक' वरिष्ठ-माध्यमिक-विद्यालय-बीहडू (बिझड़ी) इत्यस्य छात्रा अश्विका-शर्मा तथा 'ऑक्सफोर्ड स्कूल' कोटली इत्यस्य छात्रा अलीशा-ठाकुर च स्तः।

चतुर्थे स्थाने ६९६ अङ्कान् प्राप्य चत्वारः अभ्यर्थिनः सन्ति— 'ध्रुव आदर्श विद्यालय' छियाछी (सोलन) इत्यस्य छात्रा श्रुतिः, 'किड बड्स' वरिष्ठ-माध्यमिक-विद्यालय-पाङ्गा (बिझड़ी) इत्यस्य छात्रा अस्मिता-शर्मा, 'भारती विद्यापीठ' वरिष्ठ-माध्यमिक-विद्यालय-बैजनाथस्य छात्रा इशिता-वालिया, तथा च तस्यैव विद्यालयस्य छात्रः कनिशः। सर्वे एते ६९६ अङ्कैः सह चतुर्थस्थानं अलङ्कृतवन्तः।

## HPBOSE 10th Result 2026- शीर्षस्थान-प्राप्तकर्त्रीं कन्यां दूरभाषेण उक्तवान् मुख्यमन्त्री - "भवत्या हिमाचलस्य गौरवः वर्धितः

हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः रविवासरे हिमाचलप्रदेश-विद्यालयीय-शिक्षा-मण्डलस्य १०-कक्ष्यायाः परीक्षायां शीर्षस्थानं (Topper) प्राप्तवत्या कुमारी-अनमोल-कन्यया सह दूरभाषेण सम्भाषणं कृत्वा तां उत्कृष्ट-सफलतायै अभिनन्दितवान्, तस्याः उज्ज्वल-भविष्याय च शुभाशयान् प्रकटितवान्। मुख्यमन्त्रिणा उक्तं यत् अनमोल-कन्यया ९९.८६ प्रतिशतं अङ्कान् प्राप्य न केवलं स्वपरिवारस्य, अपितु सम्पूर्णस्य प्रदेशस्य नाम उज्ज्वलीकृतम्।

सम्भाषण-काले मुख्यमन्त्री तां भविष्यस्य योजनानां विषये पृष्टवान्। अस्मिन् अनमोल-कन्यया उक्तं यत् सा अध्यापन-क्षेत्रे स्वकीयां वृत्तिं (Career) निर्मातुम् इच्छति। सा अवदत् यत् तस्याः पिता अध्यापकः अस्ति, माता अपि पूर्वम् अध्यापिका आसीत्, अतः सा अपि शिक्षिका भूत्वा समाजस्य सेवां कर्तुम् इच्छति। मातृ-दिवसस्य (Mother's Day) अवसरे मुख्यमन्त्रिणा अनमोल-कन्या पृष्टा यत् किं सा अद्य स्वमातरं शुभाशयान् दत्तवती? अनमोल-कन्यया उत्तरितं यत् सा स्वमातरं मातृ-दिवसस्य अभिनन्दनं कृतवती अस्ति। सः अनमोल-कन्यया सह तस्याः अध्ययनस्य सफलतायाः मन्त्रस्य विषये अपि चर्चां कृतवान्। अनमोल-कन्यया ज्ञापितं यत् सा प्रतिदिनं पञ्च-षट् घण्टाः यावत् अध्ययनं करोति स्म, प्रातः पञ्चवादने उत्थाय च नियमितरूपेण पठति स्म।

मुख्यमन्त्रिणा अनमोल-कन्यायै जीवने निरन्तरं परिश्रमं कर्तुं श्रेष्ठ-मनुष्यः भवितुं च प्रेरणां दत्त्वा तस्याः सम्पूर्ण-परिवारं प्रति एतस्यां उपलब्धौ हार्दिक-शुभाशयाः प्रदत्ताः। तेन उक्तं यत् एतत् गर्वस्य विषयः अस्ति यत् प्रदेशस्य कन्याः निरन्तरं श्रेष्ठ-प्रदर्शनं कृत्वा हिमाचलस्य नाम देशे गौरवान्वितं कुर्वन्ति।

## "विनोदकणिका"

{१} यदि त्वं एका स्त्रीम् दयितः तदा त्वं एकः पतिः अथवा प्राणवल्लभः। यदा त्वं बहवः स्त्रियः रोचते तदा त्वं एकः आदर्शः व्यक्तिः! यदा त्वं सहस्रयः स्त्रियः रोचते तदा त्वं साहित्यिकः, कलाकारः, नेता अथवा अभिनेता, अस्ति... किन्तु नगर्यां सर्वाः स्त्रियः यदि त्वं रोचते तर्हि त्वं "जलपूरिका" विक्रेता असि निश्चयेन्।

{२} पत्नी तथा पाकिस्तान द्वयोऽपि एकस्य राश्याः अस्ति। द्वयोऽपि कदा युद्धम् आरप्स्यते वयं ज्ञातुम् असमर्थाः। भारतः तथा पतिः एकस्य राश्याः अस्ति......! कियत्कालपर्यन्त सहिष्येते?

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम**



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा -३७

प्राचीनैः ऋषिमहर्षिभिः वैदिककर्मकाण्डस्य विविधं वर्गीकरणं कृतं दृश्यते। वेदस्य प्रधानं लक्ष्यं हि ज्ञानादिदानं, येन प्राणिमात्रम् अस्य संसारस्य बन्धनकारणम् अभिज्ञाय अस्मात् मुक्तिं लब्धुं शक्नुयात्। अतो वेदेषु कर्मकाण्डं तथा ज्ञानकाण्डम् इत्यनयोः विषययोः सर्वाङ्गीणनिरूपणं कृतं वर्तते। वेदानां प्रारम्भिकभागः कर्मकाण्डं वर्तते, अपरभागश्च ज्ञानकाण्डमिति। अनयोः कर्मकाण्डं विशालतरम्। कर्मकाण्डे यज्ञानुष्ठानस्य विधिनिषेधात्मकं सर्वाङ्गीणं विवेचनं कृतमस्ति। अस्य भागस्य प्रधानोपयोगस्तु यज्ञानुष्ठानेषु हि भवति। यो वैदिकविद्वान् यजमानद्वारा यज्ञाचरणस्य अधिकारं प्राप्तवान् अस्ति, सः 'ऋत्विक्' उच्यते। एतादृशाम् ऋत्विजां चत्वारो भागाः सन्ति- होतृगणः, अध्वर्युगणः, उद्गातृगणः, ब्रह्मगणः चेति। एतस्य गणचतुष्टयस्य कारणतः, तथा प्रत्येकं वर्गाणाम् उपयोगिमन्त्राणां सङ्ग्रहानुसारं वेदाः अपि चत्वारः अभवन्। तत्संक्षेपेणात्र निरूप्यते-

ऋग्वेदः- अस्मिन् वेदे होतृवर्गस्य कृते उपयोगिमन्त्राणां संकलनं कृतं प्राप्यते। अत्र 'ऋक्' इति संज्ञकमन्त्राणाम् अधिकता प्राप्यते। अस्मिन् वेदे मन्त्रसंख्या अन्यवेदानाम् अपेक्षया अधिका ।

यजुर्वेदः- अस्मिन् वेदे यज्ञानुष्ठानार्थम् अध्वर्युवर्गस्य कृते उपयोगिमन्त्राणां संकलनमस्ति। अत्र गद्यात्मकमन्त्राणां बहुलता अवलोक्यते।

सामवेदः- अस्मिन् वेदे यज्ञानुष्ठानार्थम् उद्गातृवर्गस्य कृते उपयोगिमन्त्राणां संकलनमस्ति। अत्र गायन- पद्धतेः निश्चितमन्त्राः उपलभ्यन्ते- 'गीतिषु सामाख्या' इति।

अथर्ववेदः- अत्र यज्ञानुष्ठानार्थं ब्रह्मवर्गस्य कृते उपयोगिमन्त्राणां संकलनम् उपलभ्यते। ब्रह्मवर्गस्य कार्यं यत् यज्ञस्य विधिनिरीक्षणं, नियमानुसारं निर्देशादेशादिप्रदानं, त्रुट्यवसरे प्रायश्चित्तविधानम् इत्यादिकमिति, शम्।

# रामरक्षा स्तोत्रे 38 ऊर्जावाहिन्याः... तेषां क्रमः अधोलिखितप्रकारेण अस्ति-

१. हस्तिजिह्वा
२. गान्धारी
३. अलम्बुषा
४. पूषा
५. यशस्विनी
६. वरुणा
७. एमारिका
८. सीता
९. मातृका
१०. शिवा
११. तिक्ता
१२. शिरावती
१३. बला
१४. अमृता
१५. सरस्वती
१६. पीता
१७. नीला
१८. वृन्दा
१९. तारका
२०. विश्वोदरी
२१. अतीता
२२. तारा
२३. शारदा
२४. माधवी
२५. तारका
२६. इल्तिका
२७. युत्तरा
२८. शुक्रा
२९. इल्ता
३०. विजोलिका
३१. काली
३२. सूत्रा
३३. कुहू
३४. विश्वा
३५. अवन्तिका
३६. शङ्खिनी
३७. इडा
३८. पिङ्गला ॥

रामरक्षास्तोत्रम्

॥श्री रामरक्षास्तोत्रम्॥ विनियोगः

**सुषुम्ना**

अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य। बुधकौशिक ऋषिः। श्रीसीतारामचंद्रो देवता। अनुष्टुप् छन्दः। सीता शक्तिः। श्रीमध्द हनुमान् कीलकम्। श्रीरामचंद्रप्रीत्यर्थे जपे विनियोगः॥

**अथ ध्यानम्-**

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थम्।
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम्॥
वामांकारूढ सीतामुखकमलमिलल्लोचनं नीरदाभम्।
नानालंकारदीप्तं दधतमुरुजटामण्डनं रामचंद्रम्॥

**हस्तीजिह्वा-**

चरितं रघुनाथस्य शतकोटिप्रविस्तरम्।
एकैकमक्षरं पुंसां महापातकनाशनम्॥ १ ॥

**गांधारी-**

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम्॥ २ ॥

**अलम्बुषा-**

सासितूणधनुर्बाणपाणिं नक्तं चरान्तकम्।
स्वलीलया जगत्रातुमाविर्भूतम् अजं विभुम्॥ ३॥

**पूषा**

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम्।
शिरो मे राघवः पातु भालं दशरथात्मजः॥ ४॥

**यशस्विनी**

कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः॥ ५॥

**वरुणा**

जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः॥ ६॥

**एमारिका**

करौ सीतापतिः पातु हृदयं जामदग्न्यजित्।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः॥ ७॥

**सीता**

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः।
ऊरू रघुत्तमः पातु रक्षःकुलविनाशकृत्॥ ८॥

**मातृका**

जानुनी सेतुकृत्पातु जंघे दशमुखान्तकः।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः॥ ९॥ **शिवा**

एतां रामबलोपेतां रक्षां यः सुकृती पठेत्।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत्॥ १०॥

**तिक्ता**

पातालभूतलव्योमचारिणश्छद्मचारिणः।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः॥ ११॥

**शिरावती**

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन्।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति॥ १२॥

**बला**

जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम्।
यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः॥ १३॥

**अमृता**

वज्रपंजरनामेदं यो रामकवचं स्मरेत्।
अव्याहताज्ञः सर्वत्र लभते जयमंगलम्॥ १४॥

**सरस्वती**

आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः।
तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः॥ १५॥

**पीता**

आरामः कल्पवृक्षाणां विरामः सकलापदाम्।
अभिरामस्त्रिलोकानां रामः श्रीमान् स नः प्रभुः॥ १६॥

**नीला**

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ॥ १७॥

**वृंदा**

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ॥ १८॥

**तारका**

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम्।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघुत्तमौ॥ १९॥

**विश्वोदरी**

आत्तसज्जधनुषाविषुस्पृशा वक्षयाशुगनिषंगसंगिनौ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम्॥ २०॥

**अतीता**

सन्नद्धः कवची खड्गी चापबाणधरो युवा।
गच्छन् मनोरथोऽस्माकं रामः पातु सलक्ष्मणः॥ २१॥

**तारा**

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघुत्तमः॥ २२॥

**शारदा**

वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः।
जानकीवल्लभः श्रीमानप्रमेय पराक्रमः॥ २३॥

**माधवी**

इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः।
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः॥ २४॥

**तारका**

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम्।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नरः॥ २५ ॥

**इल्तिका**

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरम्।
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्॥
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिम्।
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्॥ २६॥

**युत्तरा**

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥ २७॥

**शुक्रा**

श्रीराम राम रघुनन्दन राम राम।
श्रीराम राम भरताग्रज राम राम॥
श्रीराम राम रणकर्कश राम राम।
श्रीराम राम शरणं भव राम राम॥ २८॥

**इल्ता**

श्रीरामचन्द्रचरणौ मनसा स्मरामि।
श्रीरामचन्द्रचरणौ वचसा गृणामि॥
श्रीरामचन्द्रचरणौ शिरसा नमामि।
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये॥ २९॥

**विजोलिका**

माता रामो मत्पिता रामचन्द्रः।
स्वामी रामो मत्सखा रामचन्द्रः॥
सर्वस्वं मे रामचन्द्रो दयालुः।
नान्यं जाने नैव जाने न जाने॥ ३०॥

**काली**

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्॥ ३१॥

**सूत्रा**

लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथम्।
कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये॥ ३२॥

**कुहू**

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥३३॥

**विश्वा**

कूजन्तं राम रामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥ ३४॥

**अवन्तिका**

आपदामपहर्तारं दातारं सर्वसम्पदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥ ३५॥

**शंखिनी**

भर्जनं भवबीजानामर्जनं सुखसम्पदाम्।
तर्जनं यमदूतानां राम रामेति गर्जनम्॥ ३६॥

**इडा**

रामो राजमणिः सदा विजयते रामं रमेशं भजे।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः॥
रामान्नास्ति परायणतरं रामस्य दासोऽस्म्यहम्।
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥ ३७॥

**पिंगला**

राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं रामनाम वरानने॥ ३८॥

इति श्रीबुधकौशिकविरचितं श्रीरामरक्षास्तोत्रं सम्पूर्णम् ॥
॥श्रीसीतारामचन्द्रार्पणमस्तु॥
।।जय जय रघुवीर समर्थ।।

sudha_sathaye@yahoo.com

